श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्री षोडशायुधस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री षोडशायुधस्तोत्रम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

स्व सङ्कल्प कला कल्पैरायुधैरायुधेश्वरः।
जुष्टः षोडशभिर्दिव्यैर्जुषतां वः परः पुमान्॥ १॥

यदायत्तं जगच्चक्रं कालचक्रं च शाश्वतम्।
पातु वस्तत्परं चक्रं चक्र रूपस्य चक्रिणः॥ २॥

यत्प्रसूति शतैरासन् रुद्राः परशुलाञ्छनाः।
स दिव्यो हेतिराजस्य परशुः परिपातु वः॥ ३॥

हेलया हेतिराजेन यस्मिन् दैत्याः समुद्धृते।
शकुन्ता इव धावन्ति स कुन्तः पालयेत वः॥ ४॥

दैत्य दानव मुख्यानां दण्ड्यानां येन दण्डनम्।
हेति दण्डेश दण्डोऽसौ भवतां दण्डयेद् द्विषः॥ ५॥

अनन्यान्वयभक्तानां रुन्धन्नाशामतङ्गजान्।
अनङ्कुशविहारो वः पातु हेतीश्वराङ्कुशः॥ ६॥

संभूय शलभायन्ते यत्र पापानि देहिनाम्।
स पातु शत वक्त्राग्नि हेतिर्हेतीश्वरस्य वः॥ ७॥

अविद्यां स्वप्रकाशेन विद्यारूपश्छिनत्ति यः।
स सुदर्शन निस्त्रिंशः सौतु वस्तत्त्वदर्शनम्॥ ८॥

क्रियाशक्तिगुणो विष्णोर्यो भवत्यतिशक्तिमान्।
अकुण्ठशक्तिः सा शक्तिरशक्तिं वारयेत वः॥ ९॥

तारत्वं यस्य संस्थाने शब्दे च परिदृश्यते।
प्रभोः प्रहरणेन्द्रस्य पाञ्चजन्यः स पातु वः ॥ १० ॥

यं सात्त्विकमहङ्कारं आमनन्त्यक्षसायकम्।
अव्याद् वश्चक्ररूपस्य तद्धनुः शार्ङ्गधन्वनः ॥ ११ ॥

आयुधेन्द्रेण येनैव विश्वसर्गो विरच्यते।
स वः सौदर्शनः कुर्यात् पाशः पाशविमोचनम्॥ १२ ॥

विहारो येन देवस्य विश्वक्षेत्रकृषीवलः।
व्यज्यते तेन सीरेण नासीरविजयोस्तु वः ॥ १३ ॥

आयुधानामहं वज्रं इत्यगीयत यः स वः।
अव्याद्धेतीश वज्रोऽसौ अदधीच्यस्थि संभवः ॥ १४ ॥

विश्व संहृति शक्तिर्या विश्रुता बुद्धि रूपिणी।
सा वः सौदर्शनी भूयात् गद प्रशमनी गदा॥ १५ ॥

यात्यतिक्षोद शालित्वं मुसलो येन तेन वः।
हेतीश मुसलेनाशु भिद्यतां मोहमौसलम्॥ १६ ॥

शूलि दृष्ट मनोर्वाच्यो येन शूलयति द्विषः।
भवतां तेन भवतात् त्रिशूलेन विशूलता॥ १७ ॥

अस्त्र ग्रामस्य कृत्स्नस्य प्रसूतिं यं प्रचक्षते।
सोऽव्यात् सुदर्शनो विश्वं आयुधैः षोडशायुधः ॥ १८ ॥

श्रीमद्वेङ्कटनाथेन श्रेयसे भूयसे सताम्।
कृतेयमायुधेन्द्रस्य षोडशायुध संस्तुतिः ॥ १९ ॥

॥ इति श्री षोडशायुधस्तोत्रं समाप्तम् ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥